ॐ नमो भगवते मृत्युञ्जयाय

ततो विष्ण्वर्पितमना, मार्कण्डेयो महामतिः ।

तुष्टाव प्रणतो भूत्वा, देवदेव जनार्दनम् ॥

विष्णुनैवोपदिष्टं तु, स्तोत्रं कर्णे महामनाः ।

सम्भावितेन मनसा, तेन तुष्टाव माधवम् ॥

ॐ नमो भगवते वासुदेवाय

नारायणं सहस्राक्षं पद्मनाभं पुरातनम् ।

प्रणतोऽस्मि हृषिकेशं, किं मे मृत्युः करिष्यति ॥

गोविन्दं पुण्डरीकाक्षम् ऽनन्तमजमव्ययम् ।

केशवं च प्रपन्नोस्मि, किं मे मृत्युः करिष्यति ॥

वाराहं वामनं विष्णुं, नारसिंहं जनार्दनाम् ।

माधवञ्च प्रपन्नोऽस्मि, किं मे मृत्युः करिष्यति ॥

पुरुषं पुष्करं पुण्यं, क्षेमबीजं जगत् पतिम् ।

लोकनाथं प्रपन्नोस्मि, किं मे मृत्युः करिष्यति ॥

भूतात्मानं महात्मानं जगद्योनि मयोनिजम् ।

विश्वरूपं प्रपन्नोऽस्मि, किं मे मृत्युः करिष्यति ॥

सहस्र शिरसं देवं, व्यक्ताव्यक्तं सनातनम् ।

महायोगं प्रपन्नोऽस्मि, किं मे मृत्युः करिष्यति ॥

इत्युदीरितमार्कण्ड्य, स्तोत्र तस्य महात्मनः ।

अपयातस्ततो मृत्युर्, विष्णुदूतैश्च पीडितः ॥

इति तेन जितो मृत्युर्, मार्कण्डेयेन धीमता ।

प्रसन्ने पुण्डरीकाक्षे, नृसिंहे नास्ति दुर्लभम् ॥

मार्कण्डेय हितार्थाय, स्वयं विष्णुरुवाच ह ।

य इदं पठते भक्त्या, त्रिकालं नियतः शुचिः ॥

नाकाले तस्य मृत्युः स्यान्नरस्याच्युत चेतसः ।

हृत्पद्ममध्ये पुरुषं पुराणं

नारायणं शाश्वतमादिदेवम् ।

संचिन्त्य सूर्यादपि राजमानं

मृत्युं स योगी जितवांस्तदैव ॥

इति श्रीनरसिंहपुराणे मार्कण्डेयकृत मृत्युञ्जय स्तोत्रं समाप्तम् ॥